No. १२२७ घ

Title तर्कसंग्रहः

Author अन्नंभट्टः

Extent ७ पत्राणि Age

Subject न्यायशास्त्रम्

तर्कसंग्रहः

१२१७

पत्राणि ८

श्री

न्याय

।।श्रीतर्कसंग्रहप्रारंभः।। २४

१६०

तर्कसंग्रह

॥१॥

ॐ ॥ श्रीगणेशायनमः ॥ ॥ निधाय हृदि विश्वेशं विधाय गुरुवंदनं ॥ बालानां सुखबोधाय क्रियते तर्कसंग्रहः ॥१
द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्तपदार्थाः ॥ तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्मम
नांसि नवैव ॥ रूप रसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्व गुरुत्वद्रवत्वस्नेहशब्द
बुद्धिसुखदुःखेछायत्नद्वेषधर्माधर्मसंस्काराश्चतुर्विंशतिगुणाः ॥ उत्क्षेपणापक्षेपणाकुंचनप्रसारणगमनानि पंचै
व कर्माणि ॥ परमपरं चेति द्विविधं सामान्यं ॥ नित्यद्रव्यवृत्तयो विशेषास्त्वनंता एव ॥ समवायस्त्वेक एव ॥ अभावश्च
वो तुर्विधः ॥ प्रागभावः प्रध्वंसात्यंताभावोन्योन्याभावश्चेति ॥ गंधवती पृथिवी ॥ सा द्विविधा ॥ नित्याऽनित्या च ॥ नित्या
परमाणुरूपा ॥ अनित्या कार्यरूपा ॥ पुनस्त्रिविधा ॥ शरीरेंद्रियविषयभेदात् ॥ शरीरमस्मदादीनां ॥ इंद्रियं गंधग्राह
कं घ्राणं नासाग्रवर्त्ति ॥ विषयो मृत्पाषाणादिः ॥ शीतस्पर्शवत्य आपः ॥ ता द्विविधाः ॥ नित्या अनित्याश्च ॥ नित्याः पर
माणुरूपाः ॥ अनित्याः कार्यरूपाः ॥ पुनस्त्रिविधाः ॥ शरीरेंद्रियविषय भेदात् ॥ शरीरं वरुणलोके ॥ इंद्रियं रस

शिव

॥१॥

ग्राहकं रसनं जिह्वाग्रवर्ति॥ विषयः सरित्समुद्रादिः॥ उष्णस्पर्शवत्तेजः॥ तच्च द्विविधं॥ नित्यमनित्यंच॥ नित्यंपरमाणुरू
पं॥ अनित्यंकार्यरूपं॥ पुनस्त्रिविधं॥ शरीरेंद्रियविषयभेदात्॥ शरीरमादित्यलोके॥ इंद्रियंरूपग्राहकं
चक्षुः कृष्णताराग्रवर्ति॥ विषयश्चतुर्विधः॥ भौमदिव्यौदर्याकरजभेदात्॥ भौमंवह्न्यादिकं॥ अबिंधनं
दिव्यंविद्युदादि॥ भुक्तान्नपरिणामहेतुरौदर्यं॥ आकरजंसुवर्णादि॥ रूपरहितः स्पर्शवान्वायुः॥ सद्विविधः॥
नित्यो॥ नित्यश्च॥ नित्यः परमाणुरूपः॥ अनित्यः कार्यरूपः॥ पुनस्त्रिविधः॥ शरीरेंद्रियविषयभेदात्॥
तर्क ४ शरीरंवायुलोके॥ इंद्रियंस्पर्शग्राहकंत्वक्सर्वशरीरवर्त्ति॥ विषयोवृक्षादिकंपनहेतुः॥ शरीरांतःसंचारीवायुःप्रा
णः॥ सएकोप्युपाधिभेदात्प्राणापानादिसंज्ञांलभते॥ शब्दगुणमाकाशं॥ तच्चैकंविभुनित्यंच॥ अतीतादिव्य
वहारहेतुःकालः॥ सचैकोविभुर्नित्यश्च॥ प्राच्यादिव्यवहारहेतुर्दिक्॥ साचैकानित्याविभ्वीच॥ ज्ञानाधिकरण
मात्मा॥ सद्विविधः॥ परमात्माजीवश्च॥ तत्रेश्वरः सर्वज्ञः परमात्माएकएव॥ जीवः प्रतिशरीरंभिन्नोविभु

त्तिमत्त्वं॥ सुखाद्युपलब्धिसाधनमिंद्रियंमनः॥ तच्चप्रत्यात्मनियतत्वादनंतमणुपरिमाणरूपंनित्यंच॥ चक्षुर्मा
त्रग्राह्योगुणोरूपं॥ तच्चशुक्लनीलपीतरक्तहरितकपिशचित्रभेदात्सप्तविधं॥ पृथिवीजलतेजोवृत्ति॥ तत्र
2 पृथिव्यांसप्तविधं॥ अभास्वरंशुक्लंजले॥ शुक्लंभास्वरंतेजसि॥ रसनग्राह्योगुणोरसः॥ सचमधुराम्लल
वणकटुकाषायतिक्तभेदात्षड्विधः॥ पृथिवीजलवृत्तिः॥ पृथिव्यांषड्विधः॥ जलेमधुरएव॥ घ्राणग्राह्यो
गुणोगंधः॥ सचद्विविधः॥ सुरभिरसुरभिश्च॥ पृथिवीमात्रवृत्तिः॥ त्वगिंद्रियमात्रग्राह्योगुणःस्पर्शः॥ स
त्रिविधः॥ शीतोष्णानुष्णाशीतभेदात्॥ पृथिव्यप्तेजोवायुवृत्तिः॥ तत्रशीतोजले॥ उष्णस्तेजसि॥ अनुष्णाशीतः
पृथिवीवाय्वोः॥ रूपादिचतुष्टयंपृथिव्यांपाकजमनित्यंच॥ अन्यत्रापाकजंनित्यमनित्यंच॥ नित्यगतंनित्यं॥ अ
२ त्वा नित्यगतमनित्यं॥ एकत्वादिव्यवहारहेतुःसंख्या॥ नवद्रव्यवृत्तिः॥ एकत्वादिपरार्द्धपर्यंता॥ एकत्वंनित्यगतंनित्यं॥ अ ।शिव
नित्यगतमनित्यं॥ द्वित्वादिकंतुसर्वत्रानित्यमेव॥ मानव्यवहारासाधारणकारणंपरिमाणं॥ नवद्रव्यवृत्तिः॥ ॥२॥

साधरणं साधारणं

तच्चतुर्विधं॥ अणु महद्दीर्घं ह्रस्वं चेति॥ पृथक्व्यवहारकारणं पृथक्त्वं॥ नवद्रव्यवृत्ति॥ संयुक्तव्यवहारहेतुः संयो-
गः॥ सर्वद्रव्यवृत्तिः॥ संयोगनाशको गुणो विभागः॥ परापरव्यवहारकारणे परत्वापरत्वे॥ ते द्विविधे॥ दिक्कृ-
ते कालकृते चेति॥ दूरस्थे दिक्कृतं परत्वं॥ समीपस्थे ऽपरत्वं॥ ज्येष्ठे कालकृतं परत्वं॥ कनिष्ठे कालकृतमपरत्वं॥
आद्यपतनासमवायिकारणं गुरुत्वं॥ पृथिवीजलवृत्ति॥ आद्यस्पंदनासमवायिकारणं द्रवत्वं॥ पृथिवीअ-
प्तेजोवृत्ति॥ तत् द्विविधं॥ सांसिद्धिकं नैमित्तिकं च॥ सांसिद्धिकं जले॥ नैमित्तिकं पृथिवीतेजसोः॥ पृथिव्यां घृतादौ॥
अग्निसंयोगजं द्रवत्वं॥ तेजसि सुवर्णादौ॥ चूर्णादिपिंडीभावहेतुर्गुणः स्नेहः॥ जलमात्रवृत्तिः॥ श्रोत्रग्राह्यो
गुणः शब्दः॥ आकाशमात्रवृत्तिः॥ स द्विविधः॥ ध्वन्यात्मको वर्णात्मकश्चेति॥ ध्वन्यात्मको भेर्यादौ॥ वर्णात्म-
कः संस्कृतभाषारूपः॥ सर्वव्यवहारहेतुर्बुद्धिर्ज्ञानं॥ सा द्विविधा॥ स्मृतिरनुभवश्च॥ संस्कारजन्यं ज्ञानं स्मृ-
तिः॥ तद्भिन्नज्ञानमनुभवः॥ स द्विविधः॥ यथार्थोऽयथार्थश्च॥ तद्वति तत्प्रकारकोऽनुभवो यथार्थः॥ सैव प्र-

मित्युच्यते॥ तदभाववति तत्प्रकारकश्चायथार्थः॥ यथार्थोनुभवश्चतुर्विधः॥ प्रत्यक्षानुमित्युपमितिशाब्दभेदात्॥ तत्क
रणमपि चतुर्विधं॥ प्रत्यक्षानुमानोपमानशब्दभेदात्॥ व्यापारवदसाधारणं कारणं करणं॥ कार्यनियतपूर्ववृ
त्तिकारणं॥ कार्यं प्रागभावप्रतियोगि॥ कारणं त्रिविधं॥ समवाय्यसमवायिनिमित्तभेदात्॥ यत्समवेतं कार्यं
मुत्पद्यते तत्समवायिकारणं॥ यथा तंतवः पटस्य॥ पटश्च स्वगतरूपादेः॥ कार्येण कारणेन वा सहैकस्मिन्नर्थे सम
वेतत्वे सति कारणमसमवायिकारणं॥ यथा तंतुसंयोगः पटस्य॥ तंतुरूपं पटरूपस्य॥ तदुभयभिन्नं कारणं
निमित्तकारणं॥ यथा तुरीयवेमादिकं पटस्य॥ तत्रिविधकारणमध्ये यदसाधारणं कारणं तदेव करणं॥ तत्र प्र
त्यक्षज्ञानकारणं प्रत्यक्षं॥ इंद्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षं॥ तद्द्विविधं॥ निर्विकल्पकं सविकल्पकं च॥ तत्र नि
ष्प्रकारकं निर्विकल्पकं॥ सप्रकारकं सविकल्पकं॥ यथा डित्थोयं ब्राह्मणोयं श्यामोयमिति॥ प्रत्यक्षज्ञानहेतुरिंद्रि
यार्थसन्निकर्षः षड्विधः॥ संयोगः संयुक्तसमवायः संयुक्तसमवेतसमवायः॥ समवायः॥ समवेतसमवायः॥

विशेषणविशेष्यभावश्चेति ॥ चक्षुषा घटप्रत्यक्षजनने संयोगसन्निकर्षः ॥ घटरूपप्रत्यक्षे संयुक्तसमवायः ॥ च
क्षुःसंयुक्ते घटे रूपस्य समवायात् ॥ रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः ॥ चक्षुःसंयुक्ते घटे रूपं सम
वेतं ॥ तत्र रूपत्वस्य समवायात् ॥ श्रोत्रेण शब्दसाक्षात्कारे समवायः ॥ कर्णविवरवृत्याकाशस्य श्रोत्रत्वात् ॥ श
ब्दस्याकाशगुणत्वात् ॥ गुणगुणिनोश्च समवायात् ॥ शब्दत्वसाक्षात्कारे समवेतसमवायः सन्निकर्षः ॥ श्रोत्रसम
वेते शब्दे शब्दत्वस्य समवायात् ॥ अभावप्रत्यक्षे विशेषणविशेष्यभावः सन्निकर्षः ॥ घटाभाववद्भूतलमित्यत्र
चक्षुःसंयुक्ते भूतले घटाभावस्य विशेषणत्वात् ॥ एवं सन्निकर्षषट्कजन्यं ज्ञानं प्रत्यक्षं ॥ तत्करणमिन्द्रियं ॥ तस्मा
त्प्रत्यक्षप्रमाणमिन्द्रियमिति सिद्धं ॥ अनुमितिकरणमनुमानं ॥ परामर्षजन्यं ज्ञानमनुमितिः ॥ व्याप्तिविशिष्टपक्षध
र्मताज्ञानं परामर्षः ॥ यथा वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानं परामर्षः ॥ तज्जन्यं पर्वतो वह्निमानिति ज्ञानमनुमि
तिः ॥ यत्र धूमस्तत्राग्निरिति साहचर्यनियमो व्याप्तिः ॥ व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मता ॥ अनुमानं द्विविधं ॥

4

स्वार्थंपरार्थंच॥स्वार्थंस्वानुमितिहेतु॥तथाहि॥स्वयमेवभूयोदर्शनेनयत्रधूमस्तत्राग्निरितिरिमहानसादौव्याप्तिं
गृहीत्वापर्वतसमीपंगतः॥तद्गतेचाग्नौसंदिहानःपर्वतेधूमंपश्यन्व्याप्तिंस्मरति॥यत्रयत्रधूमस्तत्रतत्राग्निरिति
तदनंतरंवह्निव्याप्यधूमवानयंपर्वतइतिज्ञानमुत्पद्यते॥अयमेवलिंगपरामर्शइत्युच्यते॥तस्मात्पर्वतोवह्निमानितिज्ञान
मनुमितिरुत्पद्यते॥तदेतत्स्वार्थानुमानं॥यत्तुस्वयंधूमादग्निमनुमायपरप्रतिपत्यर्थंपंचावयववाक्यंप्रयुज्यते॥
तत्परार्थानुमानं॥यथापर्वतोवह्निमान्॥धूमात्त्ववत्वात्॥योयोधूमवान्ससोऽग्निमान्॥यथामहानसः॥तथाचा
यं॥तस्मात्तथेति॥अनेनप्रतिपादिताल्लिंगात्परोऽप्यग्निंप्रतिपद्यते॥प्रतिज्ञाहेतूदाहरणोपनयनिगमनानिपंचाव
यवाः॥पर्वतोऽग्निमानितिप्रतिज्ञा॥धूमवत्वादितिहेतुः॥योयोधूमवानितिउदाहरणं॥तथाचायमित्युपनयः॥त
स्मात्तथेतिनिगमनं॥स्वार्थानुमितिपरार्थानुमित्योर्लिंगपरामर्शएवकारणं॥तस्माल्लिंगपरामर्शोऽनुमानं॥लिं शिवः
गंत्रिविधं॥अन्वयव्यतिरेकि॥केवलान्वयि॥केवलव्यतिरेकीचेति॥अन्वयेन--व्यतिरेकेणचव्याप्तिमदन्वयव्यति ॥४॥

का॥ यथा वह्नौ साध्ये धूमत्वं॥ यत्र धूमस्तत्राग्निरित्यन्वयव्याप्तिः॥ यत्र वह्निर्नास्ति। न तत्र धूम इति व्यतिरेकव्याप्तिः॥
हृदमहानसादिदृष्टांतः॥ अन्वयमात्रव्याप्तिकं केवलान्वयि॥ यथा घटोऽभिधेयः॥ प्रमेयत्वात्॥ पटवदित्यत्र
प्रमेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिर्नास्ति॥ सर्वस्य प्रमेयत्वादभिधेयत्वाच्च॥ व्यतिरेकमात्रव्याप्तिकं केवलव्य
तिरेकि॥ यथा पृथिवीतरेभ्यो भिद्यते॥ गंधवत्वात्॥ यदितरेभ्यो न भिद्यते। न तद्गंधवत्॥ यथा जलं॥ न चेयं॥ त
थात्तस्मान्न तथेति॥ अत्र यद्गंधवत्तदितरभिन्नमित्यन्वयदृष्टांतो नास्ति॥ पृथिवीमात्रस्य पक्षत्वात्॥ संदि
ग्धसाध्यवान्पक्षः॥ यथा धूमवत्वे हेतौ पर्वतः॥ निश्चितसाध्यवान्सपक्षः॥ यथा तत्रैव महानसः॥ साध्याभाव निश्चित
वान्विपक्षः॥ यथा तत्रैव महाह्रदः॥ सव्यभिचार[redacted] विरुद्धसत्प्रतिपक्ष[redacted] सिद्ध[redacted] बाधिताः पंचहेत्वाभा
साः॥ सव्यभिचारोऽनैकांतिकः॥ स त्रिविधः॥ साधारणासाधारणानुपसंहारिभेदात्॥ तत्र साध्याभाववद्वृ
त्तिः साधारणोऽनैकांतिकः॥ यथा पर्वतोऽग्निमान्प्रमेयत्वादिति प्रमेयत्वस्य वह्न्यभाववति ह्रदे विद्यमानत्वात्॥

5 सपक्षव्यावृत्तोऽसाधारणः॥ यथा शब्दो नित्यः। शब्दत्वादिति॥ शब्दत्वं सर्वेभ्यो नित्येभ्यो व्यावृत्तं शब्दमात्रवृत्ति॥ अ
न्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारी॥ यथा सर्वमनित्यं प्रमेयत्वादिति॥ अत्र सर्वस्यापि पक्षत्वाद्दृष्टान्तो नास्ति॥
साध्याभावव्याप्तो हेतुर्विरुद्धः॥ यथा शब्दो नित्यः कृतकत्वादिति। कृतकत्वं हि नित्यत्वाभावेन अनित्यत्वेन व्या
प्तः॥ साध्याभावसाधकं हेत्वन्तरं यस्य स सत्प्रतिपक्षः॥ यथा शब्दो नित्यः श्रावणत्वात्॥ शब्दत्ववत्॥ श
ब्दोऽनित्यः कार्यत्वात्॥ घटवदिति॥ असिद्धस्त्रिविधः॥ आश्रयासिद्धः स्वरूपासिद्धो व्याप्यत्वासिद्धश्चेति॥
आश्रयासिद्धो यथा॥ गगनारविन्दं सुरभि अरविन्दत्वादिति॥ सरोजारविन्दवदिति॥ अत्र गगनारविं
दमाश्रयः स च नास्त्येव॥ स्वरूपासिद्धो यथा॥ शब्दो गुणः चाक्षुषत्वादिति॥ अत्र चाक्षुषत्वं शब्दे नास्ति॥
शब्दस्य श्रावणत्वात्॥ सोपाधिको व्याप्यत्वासिद्धः॥ साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधिः॥ साध्य त्रिव
सामानाधिकरणात्यन्ताभावाप्रतियोगित्वं साध्यव्यापकत्वं॥ साधनवन्निष्ठात्यन्ताभावप्रतियोगित्वं साधनाव्या ॥५॥

पकत्वं॥ यथा वह्निना धूमे साध्ये आर्द्रेंधनसंयोग उपाधिः॥ पर्वतो धूमवान् वह्निमत्वादित्यत्र आर्द्रेंधसंयोगउ
पाधिः॥ यत्र धूमस्तत्र आर्द्रेंधनसंयोग इति साध्यव्यापकता॥ यत्र वह्निस्त[redacted]त्र आर्द्रेंधनसंयोगो ना[redacted]स्ति अ
योगोलके[redacted] आर्द्रेंधनाभावात्॥ एवं साध्यव्यापकत्वे सति साधना[redacted]व्यापकत्वादार्द्रेंधनसंयोग उपाधिः॥ सो
पाधिकत्वात्॥ वह्निमत्त्वं व्याप्यत्वासिद्धं॥ यस्य साध्याभावः प्रमाणेन निश्चितः स बाधितः॥ यथा वह्निरनु
ष्णः द्रव्यत्वादिति॥ अत्र अनुष्णत्वं साध्यं तदभाव[redacted] उष्णत्वं स्पर्शनप्रत्यक्षेण गृह्यत इति बाधितत्वं माख्यातम
तद नुमानं॥ उपमितिकरणमुपमानं॥ संज्ञासंज्ञिसंबंधज्ञानमुपमितिः॥ तत्करणं सादृश्यज्ञानं॥ तथाहि॥ कश्चित् गवय
शब्दार्थमजानानः कुतश्चिदारण्यकपुरुषाद्गोसदृशो गवय इति श्रुत्वा गहनं गतो वाक्यार्थं स्मरन् गोसदृशं पिंडं पश्यति
तदनंतरमयं गवयशब्दवाच्य इत्युपमितिरुत्पद्यते॥ आप्त[redacted]वाक्यं शब्दः॥ आप्तस्तु यथार्थवक्ता॥ वाक्यं पदसमूहः
यथा गामानय शुक्लां दंडेनेति॥ शक्तं पदं॥ अस्मात्पदादयमर्थो बोधव्य इतीश्वरसंकेतं शक्तिः॥ आकांक्षा योग्यतास

न्वयान

न्निधिश्च वाक्यार्थज्ञाने हेतुः॥ पदस्य पदां[redacted]तरव्यतिरेकप्रयुक्ता नुभावकत्वमाकांक्षा॥ अर्थाबाधो योग्यता॥ पदानामवि श्री

र०॥२ लंबेनोच्चारणं संनिधिः॥ आकांक्षारहितं वाक्यमप्रमाणं॥ यथा गौरश्वः पुरुषो हस्तीति न प्रमाणं॥ आकांक्षावि

रहात्॥ अग्निना सिंचेदिति न प्रमाणं॥ योग्यताविरहात्॥ प्रहरे प्रहरे असहोच्चारितानि गामानयेत्यादिपदानि न प्रमा

6 णं॥ संनिध्यभावात्॥ वाक्यं हि द्विविधं॥ वैदिकं लौकिकं च॥ वैदिकमीश्वरोक्तत्वात्सर्वमेव प्रमाणं॥

लौकिकं तु आप्तोक्तं प्रमाणं अन्यदप्रमाणं॥ वाक्यार्थज्ञानं शाब्दज्ञानं॥ तत्करणं शब्दः॥ यथार्थानुभावो निरूपितः॥

अयथार्थानुभावस्त्रिविधः॥ संशयविपर्ययतर्कभेदात्॥ एकस्मिन्धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यज्ञानं संशयः॥

यथा स्थाणुर्वा पुरुषो वेति॥ मिथ्याज्ञानं विपर्ययः॥ यथा शुक्ताविदं रजतमिति॥ व्याप्यारोपेण व्यापकारोपस्तर्कः॥ यथा य

दि वह्निर्न स्यात्तर्हि धूमो न स्यादिति॥ स्मृतिरपि द्विविधा यथार्था अयथार्था च प्रमाजन्या यथार्था॥ अप्रमाजन्या अयथार्था॥ स शिवः

र्वेषामनुकूलवेदनीयं सुखं॥ प्रतिकूलवेदनीयं दुःखं॥ इच्छा कामः॥ क्रोधो द्वेषः॥ कृतिः प्रयत्नः॥ विहितकर्मजन्यो ध ॥६॥

मेः॥ निषिद्धकर्मजन्यस्त्वधर्मः॥ बुद्ध्यादयोऽष्टावात्ममात्रगुणा बुद्धीच्छाप्रयत्ना नित्याश्चानित्याश्च॥ नित्या ईश्वरस्य॥ अनित्या
जीवस्य॥ आत्ममात्रवृत्तयः॥ संस्कारस्त्रिविधः॥ वेगो भावना स्थितिस्थापकश्चेति॥ वेगः पृथिव्यादिचतुष्टयमनोवृत्तिः॥
अनुभवजन्या स्मृतिहेतुर्भावना॥ आत्ममात्रवृत्तिः॥ अन्यथाकृतस्य पुनस्तादवस्थ्यापादकः स्थितिस्थापकः॥ कटा ६३
दिपृथिवीवृत्तिः चलनात्मकं कर्म॥ ऊर्ध्वदेशसंयोगहेतुरुत्क्षेपणं॥ अधोदेशसंयोगहेतुरपक्षेपणं॥ शरीरसं[illegible] न्ति४...
४ कृष्टसंयोगहेतुराकुंचनं॥ विप्रकृष्टसंयोगहेतुः प्रसारणं॥ अन्यत्सर्वं गमनं॥ नित्यमेकमनेकानुगतं सामान्यं द्रव्यगु
णकर्मवृत्ति॥ परं सत्ता अपरं द्रव्यत्वादि॥ नित्यद्रव्यवृत्तयो व्यावर्तका विशेषा नित्याः॥ नित्यः संबंधः समवायः अयु
तसिद्धवृत्तिः॥ ययोर्मध्ये एकमपराश्रितमेवावतिष्ठते तावयुतसिद्धौ॥ अवयवावयविनौ गुणगुणिनौ क्रियाक्रिया
वंतौ जातिव्यक्ती विशेषनित्यद्रव्ये चेति॥ अनादिः सांतः प्रागभावः उत्पत्तेः पूर्वं कार्यस्य॥ सादिरनंतः प्रध्वंसः उत्प
त्त्यनंतरं कार्यस्य॥ त्रैकालिकः संसर्गावच्छिन्नप्रतियोगिकोऽत्यंताभावः॥ यथा घटो नास्तीति॥ तादात्म्यावच्छिन्नप्रति

श्रीगणेशाय नमः श्रीराम

7

१

योगिकान्योन्याभावः॥ यथा। घटपटयोरनन्नवर्तीति॥ सर्वेषामपिपदार्थानां यथायुक्तिरेवांतर्भावात्सप्तैव पदार्थाः॥ ॥इतिसिद्धकणादन्यायमतयोर्बालव्युत्पत्तिसिद्धये॥ अन्नंभटेन विदुषा रचितस्तर्कसंग्रहः॥
श्रीरस्तु॥ हरिरामेण लिखितमिदंपुस्तकं वाराणस्यां संवत् १७८७ वर्षे श्रावणशुदिपौर्णमासी रविवासरे
श्रीरामहेरामहेरामहेरामश्रीराम॥ ॥छ॥ ॥छ॥ ॥श्री॥ ॥श्री॥ ॥श्रीः

पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन॥ एते सुबंताः सुबंतेन समानाधिकरणे न समस्यंते॥ भिन्ननिमित्तप्रयुक्तस्य शब्दस्यैकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यं॥ पूर्वकाल इत्यर्थनिर्देशः संबंधिशब्दत्वात् पूर्वकालशब्दस्यापरकालापेक्षा भवति॥ अतः पूर्वकालपरिग्रहे कृते अपरकालस्यापि परिग्रहं भवति॥ एवंसति पूर्वकालवाचकः अपरकालवाचकेन समस्यत इत्यर्थः संपद्यते॥ स्नातानुलिप्तः॥ पूर्वं स्नातः पश्चादनुलिप्तः॥ स्नात इति पूर्वकालवाचकः॥ स्नानेन निमित्तेन प्रयुज्यते॥ अनुलिप्त इति अपरकालवाचकः॥ स्नानादनु पश्चात्लेपेन निमित्तेन प्रयुज्यते॥ तयोरैकत्र वृत्तिरिति [illegible] अस्ति सामानाधिकरण्यं॥

स्तो

१॥ वृः
॥७॥